इलोकः स्वयमेव। अग्रन्थिष्ट इलोकः स्वयमेव। ब्रवीति [1]इलोकं देवदत्तः। ब्रूते [2]इलोकः स्वयमेव। अवोचत् इलोकं देवदत्तः। अवोचत इलोकः स्वयमेव। आत्मनेपद[3]विधानेऽकर्मकाणाम् – [4]आहन्ति माणवकं देवदत्तः। आहते माणवकः स्वयमेव। आवधिष्ट माणवकः स्वयमेव, आहत इति वा। [5]विकुर्वते सैन्धवाः स्वयमेव। व्यकृषत सैन्धवाः स्वयमेव॥

## कुषिरजोः प्राचां श्यन् परस्मैपदं च। (९०/२७७२)

'[6]कुष निष्कर्षे' (धा.पा. १५१९), 'रञ्ज रागे' (धा.पा. ११६८), अनयोर्धात्वोः कर्मकर्तरि प्राचामाचार्याणां मतेन श्यन् प्रत्ययो भवति, परस्मैपदं च। यगात्मनेपदयोरपवादौ। कुष्यति पादः स्वयमेव। रज्यति वस्त्रं स्वयमेव। [7]प्राचां ग्रहणं विकल्पार्थम्। कुष्यते। रज्यते। व्यवस्थितविभाषा चेयम्। तेन [8]लिट्लिङोः स्यादिविषये च न [9]भवतः। [10]चुकुषे पादः स्वयमेव। ररञ्जे वस्त्रं स्वयमेव। कोषिषीष्ट पादः स्वयमेव। रङ्क्षीष्ट वस्त्रं स्वयमेव। कोषिष्यते पादः स्वयमेव। [11]रङ्क्ष्यते वस्त्रं स्वयमेव। अकोषि पादः स्वयमेव। अरञ्जि वस्त्रं स्वयमेव (म. भा. २. ७०)॥

## धातोः। (९१/२८२९)

धातोः [12]इत्ययमधिकारो वेदितव्यः। आतृतीयाध्यायपरिसमाप्तेः [13]यदित ऊर्ध्वमनुक्रमिष्यामो धातोः इत्येवं तद् वेदितव्यम्। वक्ष्यति – 'तव्यत्तव्यानीयरः' (३.१.९६/२८३४) इति। कर्तव्यम्। करणीयम्। धातुग्रहणमनकर्थकं यङविधौ धात्वधिकारात् (म. भा. २. ७४)। कृदुपपदसञ्ज्ञार्थं [14]तर्हि, अस्मिन् धात्वधिकारे [15]ते यथा स्यातां, पूर्वत्र मा भूताम् इति। आर्धधातुकसञ्ज्ञार्थं च द्वितीयं धातुग्रहणं कर्तव्यम्। धातोः इत्येवं विहितस्य[16] यथा स्यात्। इह मा भूत्, लूभ्याम्, लूभिः इति॥

## तत्रोपपदं सप्तमीस्थम्। (९२/७८१)

तत्रैतस्मिन् धात्वधिकारे तृतीये यत् [17]सप्तमीनिर्दिष्टं तद् उपपदसञ्ज्ञं भवति। वक्ष्यति – 'कर्मण्यण्' (३.२.१/२९१३)। [18]कुम्भकारः। स्थग्रहणं सूत्रेषु सप्तमीनिर्देशप्रतिपत्त्यर्थम्। इतरथा हि सप्तमी श्रूयते यत्र तत्रैव स्यात्, स्तम्बेरमः, कर्णेजपः (म.भा.२.७५) इति। यत्र वा सप्तमीश्रुतिरस्ति 'सप्तम्यां जनेर्डः' (३.२.९७/३००७) इति, [19]उपसरजः, मन्दुरजः इति। स्थग्रहणात् तु सर्वत्र भवति। '[20]गुरुसञ्ज्ञाकरणमन्वर्थसञ्ज्ञा-विज्ञाने सति समर्थपरिभाषाव्यापारार्थम्। पश्य कुम्भं, करोति कटम् (म. भा. २. ७५) इति प्रत्ययो न भवति। उपपदप्रदेशाः – 'उपपदमतिङ्' (२.२.१९/७८२) इत्येवमादयः॥

---

1. कथां ड. 2. कथा ड. 3. विधौ फ. 4. हन्ति अ. ब. क. 5. विकुरुते सैन्धवान् देवदत्तः अ. 6. कुषि निकर्षणे क. हृ. 7. वाक्यमिदं नास्ति हृ. 8. लिङलिटोः क.अ. 9. भविष्यति ड. 10. उदाहरणमिदं नास्ति ब. क. 11. रंक्षीष्ट क. 12. अयं नास्ति फ. 13. यान् इत अ. क. 14. तर्हि नास्ति क, तु ड. 15. तु फ. 16. च इत्यधिकम् क. 17. सप्तम्या निर्दिष्टं ब.क. 18. कुम्भकारकः क.ड.हृ. 19. नास्ति फ. हृ. 20. गुरुसञ्ज्ञाकरणमन्वर्थसञ्ज्ञार्थम्, अन्वर्थसंज्ञा° ब.